चरस्य कर्तारमनं तं विभवं विभुं। आत्मानमेव यो वेत्ति स त्वात्मज्ञ इति स्मृतः। शिवधर्मरताः शांताः शिवज्ञानपरायणाः। शिवधर्मप्रवक्तारो
विप्राः स्युः शिवयोगिनः। मनुः। अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः। तमपीह गुरुं विद्यात् श्रुतोपक्रियया तथा। व्यासः। अग्न्याधेयं पाकयज्ञम
ग्निष्टोमादिकं तथा। यः करोति वृतो न्यूनमृत्विजं तं प्रचक्षते। संज्ञांतराण्याह यमः। ब्राह्मणश्चानूचानो भ्रूण ऋषिकल्प श्रोत्रिय बृहस्पतिः। आ
चिनोति च शास्त्राणि आचारे स्थापयत्यपि। स्वयमाचरते यस्तु तमाचार्यं प्रचक्षते। संज्ञांतराण्याह यमः। ब्राह्मणश्चानूचानो भ्रूण ऋषिकल्प श्रोत्रिय
भ्रूणसंज्ञा अनूचानकवेदपारगान् वस्नातांश्च साध्वनपि। देवलः। मात्रश्च ब्राह्मणश्चैव श्रोत्रियश्च ततः परं। अनूचानस्तथा भ्रूण ऋषिकल्प ऋषि
र्मुनिः। इत्येतेष्टौ समुद्दिष्टा ब्राह्मणाः प्रथमं श्रुतौ। ब्राह्मणानां कुले जातो जातिमात्रो यदा भवेत्। अनुपेतः क्रियाहीनो मात्र इत्यभिधी
यते। एकादशमतिक्रम्य वेदस्याचारवान् द्विजः। स ब्राह्मण इति प्रोक्तो निभृतः सत्यवाग्घृणी। किंचिन्न्यूनवेदाध्ययनमेकदेशातिक्रामः।

श्राद्ध·टी· ३६

36

एकोशाखां सकल्पां वा षड्भिरंगैरधीत्य वा। षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्। विद्वेदांगतत्वज्ञः शुद्धात्मा पापवर्जितः। शिष्टः श्रोत्रियतां
प्राप्तः सोनूचान इति स्मृतः। अनूचानगुणोपेतो यज्ञस्वाध्याययंत्रितः। भ्रूण इत्युच्यते शिष्टैः शेषभोजी जितेंद्रियः। वैदिकं लौकिकं चैव सर्वज्ञानम
वाप्य यः। आश्रमस्थो वशी नित्यमृषिकल्प इति स्मृतः। ऊर्ध्वरेता भवत्यग्रे नियताशी न संशयः। शापानुग्रहयोः शक्तः सत्यसंधो भवेदृषिः। नि
वृत्तः सर्वतत्वज्ञः कामक्रोधविवर्जितः। ध्यानस्थो निष्क्रियो दांतस्त्रिशुक्लश्चानृतो मुनिः। एवमन्वयविद्याभ्यां दशैते च समुच्छ्रिताः। त्रिशुक्ला ना
म विप्रेंद्राः पूज्यंते सवनादिषु। संवर्तः। उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं। वेत्ति विद्यामविद्यां च स भवेद्वेदपारगः। मनुः। सांतानिकं यक्ष्यमा
णमध्वगं सार्ववेदसं। गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनं। नवैतान्स्नातकान्विद्याद्ब्राह्मणान्धर्मभिक्षुकान्। अध्वगो धर्मार्थं चलितः सार्व
वेदसः सर्वदक्षिणयज्ञकृत्। उपतापी व्याधितः। प्रज्ञायागगुरुपितृमातृवेदार्थं स्नानकृतोन्ये। आदित्यपुराणे। अक्रोधना धर्मपराः शांताः शमदमे
रताः। निस्पृहाश्च महाराजन्ते विप्राः साधवः स्मृताः। सौरिगंगापयुनयोर्मध्ये मध्यदेशः प्रकीर्तितः। तत्रोत्पन्ना द्विजा ये वै साधवस्ते प्रकीर्तिताः। संज्ञां
तरापगाहमोरार्यावपि वै जितेंद्रियकुलान्नो शिष्टमाद्भः प्रशस्ता विप्रात्। वसिष्ठः। अष्टवर्षात्तु यादन्ना श्रुतशीलसमन्विते। सा गोरीतस्तुतोप्यसु स

राम· ३६

गोरः परिकीर्तितः। देवलः। धर्माधर्मविभागज्ञो निविष्टो वेदशासने॥ क्रियावान् ज्ञानमाधीनो ह्यार्यो म्लेच्छो विपर्यये। हारीतः। कांऽस्मेषां कुलख्या
ख्यापर्वणिपाङ्क्तेयानि तु। यस्तु तन्मापयेद्दत्तेस्मकुलीन इति श्रुतिः। यमः। श्रुत्वा स्पृष्ट्वाथ दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः। न हृष्यति ग्लायति वा स
विज्ञेयो जितेंद्रियः। न पाणिपादचपलो न नेत्रचपलो द्विजः। न च वाक्कपलश्चैव इति शिष्टस्य लक्षणं। इति पंचशास्त्रब्राह्मणसंज्ञाः। अथ ब्राह्मणा
नाह। अथ षट्स्थाष्टकथिता। अब्राह्मणा आकरे। शातातपः। अब्राह्मणास्तु षट् प्रोक्ता ऋषिः शातातपोऽब्रवीत्। आद्यो राजभृतस्तेषां द्वितीयः क्रे
यविक्रयी॥ तृतीयो बहुयाज्यः स्याच्चतुर्थो ग्रामयाचकः। पंचमस्तावकस्तेषां ग्रामस्य नगरस्य वा। अनागतेऽर्कीयः पूर्वां सादित्यां चैव पश्चिमां॥ नो
पासीत द्विजः संध्यां स षष्ठोऽब्राह्मणः स्मृतः। मनुः। तान्यब्राह्मणो भवति न वणिक् न कुशीलवः। न शूद्रप्रेषणं कुर्वन्न स्तेनो न चिकित्सकः। अ
नृक्षन्नाम्ही नो वेदस्तूष्पः कुशीलवो गीतनृत्यवृत्तिः। व्यासः। ब्रह्मबीजसमुत्पन्नो मंत्रसंस्कारवर्जितः। जातिमात्रोपजीवी च भवेदब्राह्मणस्तु
सः। देवलः। कूपमात्रोदकग्रामे विप्रः संवत्सरं वसन्। शौचाचारपरिभ्रंशाद्ब्राह्मण्याद्विप्रच्यवते। अथ दुर्ब्राह्मणा वाह बोड ब्राह्मणको। हारीतः
पत्निमानदपघ्नायेमर्परपरिभ्रंशाकच्छपघातिनः। नानाजंतुवधे सक्ताः प्रोक्ता दुर्ब्राह्मणा हि ते। यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषं। स वै

श्राद्ध·टी·
३७

37

दुर्ब्राह्मणो नामयश्चैव वृषलीपतिः। वृषलीपत्यादीनाह दक्षो वृषलीपत्याद्भयाः। तत्राद्यस्तावद्योगेन शूद्रापतिरेव। पारिभाषिकास्तु। उशनाः। वं
ध्या वृषली ज्ञेया वृषली च मृतप्रजा। अपरा वृषली ज्ञेया कुमारी या रजस्वला। यस्त्वेतामुद्वहेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः। अश्राद्धेयमपांक्तेयं तं वि
द्याद्वृषलीपतिं। चमत्कारखंडे वृषो हि भगवान्धर्मस्तस्य यः कुरुते त्वलं। वृषलं तं विदुर्देवाः सर्वधर्मबहिष्कृतं। तथैव बध्वा वृषली तत्पतिर्वृषलीपतिः।
प्रभासखंडे। स्वं वृषं तु परित्यज्य परेणा तु वृषायते। वृषली सा तु विज्ञेया न शूद्री वृषली भवेत्। चांडाली बंधकी वेश्या रजःस्था या च कन्यका। ऊ
ढा या च सगोत्रा स्यात् वृषल्यः संप्रकीर्तिताः। किंच। एककोऽज्ञानाद्भूः। तत्रैव। परदाराभिगामी मोहात्पुरुषोऽज्ञान उच्यते। किंच। दिधिषूपतिद्वयं।
यमः। पुनर्भुवः पतिर्यस्तु स भवेद्दिधिषूपतिः। वृद्धमनुः। भ्रातुर्मृतस्य भार्यायां योऽनुरज्येत कामतः। धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषूप
तिः। किंच। अथाग्रे शूर्वकस्त्वेककः। मनुः। परश्वीपतिं धीरा वदंति दिधिषूपतिं। द्विजोऽग्रे दिधिषुस्त्वैव यस्य सैव कुटुंबिनी। किंच। द्वौ चोक्ता
ववकीर्णिनौ। देवलः। स्खलितिंग्यवकीर्णी स्याद्यश्च भग्नव्रतस्तथा। दंडादिहीन आद्यः। विप्लुतब्रह्मचर्योऽन्यः। अथ शूद्रतुल्यानाह अथमता राम·
श्चाष्टादशान्येऽवरेटाद्याः शूद्रसमाः। देवलः। द्वितीयस्य पितुर्यो नं भुक्त्वा परिणतो द्विजः। अवरेट इति ज्ञेयः शूद्रधर्मा स वेष्यते। प्रतिग्रहीतु ३७

र्यः पित्रा सवर्णायां प्रजायते। अवरेट इति ज्ञेयः शूद्रधर्मा सजातितः। चमत्कारखंडे। वृषो हि भगवान्धर्मस्तस्य यः कुरुते ह्यलं। वृषलं तं विदुर्देवाः
सर्वधर्मबहिष्कृतं। मनुः। गोरक्षकान्वाणिजकांस्तथा कारुकुशीलवान्। विप्रान्प्रेष्यान्नूनवर्णो राजन्शूद्रवदाचरेत्। कारवो वर्धक्यादिकृन्नयः
बौधायनः। विप्रान्वार्धुषिकांश्चैव राजन्शूद्रवदाचरेत्। भविष्यत्पुराणे। नयस्य वेदो न तपो न विद्या च विशांपते। स शूद्र इव मंतव्यः। वैश्वदेवेन ये ही
ना आतिथ्येन बहिष्कृताः। सर्वे ते वृषला ज्ञेयाः। वशिष्ठः। उदकान्वासते येषां ये च केचिदनग्नयः। कुलं वा श्रोत्रियं येषां ते सर्वे शूद्रधर्मिणः।
देवलः। अनुपासितसंध्या ये नित्यमस्नानभोजनाः। नष्टशौचाः पतंत्येते शूद्रतुल्याश्च धर्मतः। अथ ब्राह्मणब्रुवादीनाह। अथ पृथक्स्थिताः ब
ह्वब्रह्मबंधाक्रियाः। हारीतः। शूद्रप्रेष्यो भृतो राज्ञा वृषलो ग्रामयाजकः। वधबंधोपजीवी च षडेते ब्रह्मबंधवः। किंच। द्वौ ब्रह्मभुवकौ। संवर्तः। अव्र
तो वैश्यराजन्यौ शूद्रश्चाब्राह्मणास्त्रयः। वेदव्रतविहीनश्च ब्राह्मणो ब्राह्मणब्रुवः। वशिष्ठः। गर्भाधानादिभिर्युक्तस्तथोपनयनादिमान्।
न कर्म वा न चाधीते स भवेद्ब्राह्मणब्रुवः। किंच। तथा निगदितौ द्वौ ब्रह्मरक्षोभिधौ। ब्रह्मांडे। आत्मार्थं यः पचेदन्नं न देवातिथिकारणात्
नार्हत्यसावतिपित्र्यार्थं स चोक्तो ब्रह्मराक्षसः। हारीतः। अपि विद्याकुलैर्युक्ता हीनवृत्ता नराधमाः। क्षुद्रद्वेषनिरता नित्यं यातुधानाः प्र

श्राद्ध·टी· कीर्तिताः। किंच। वांताशिद्वयमपि। विष्णुः। देशं गोत्रं कुलं विद्यामन्नार्थं यो निवेदयेत्। दैवस्वातेषु धर्मेषु वांताशी स प्रकीर्तितः। सर्वज्ञावय
३८ मित्येवमभिमानरता नराः। वांताशिनः परित्याज्याः श्राद्धे दाने च लंपटाः। किंच। अथाकथितकुंडगोलकथा। मनुः। परदारेषु जायेते द्वौ सु
तौ कुंडगोलकौ। पत्यौ जीवति कुंडः स्यान्मृते भर्तरि गोलकः। नियुक्तौ हव्यकव्यानि नाशयेतां प्रदायिनां। किंच। त्रिधा कुंडाशी। मनुः। यस्तयोरन्न
38 मश्नाति स कुंडाशुच्यते द्विजः। यमः। जीवे पितरि योन्येन जातः कुंडः स उच्यते। तस्य यो ब्राह्मणो भुंक्ते स कुंडाशीति गद्यते। ब्राले। चतुःषष्टिपलै
शुद्धैः कुंडप्रस्थचतुष्टयं। भक्षेन्न यस्तु निगिरेत्स कुंडाशी पतत्यधः। किंच। बकवृत्तिरेकः। यमः। अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः। स्वयं
मिथ्याविनीतश्च बकवृत्तधरो द्विजः। कांडपृष्ठानाह। श्रा विप्रसंस्थाः कांडपृष्ठा मताः। हारीतः। सूर्यापुत्राः स्वदत्ता ये ये चैते क्रीतकाः स्मृताः। स
वैतेमे त्रिगणाः प्रोक्ताः कांडपृष्ठा न संशयः। सूर्यापुत्राः कानीनाः। यमः। आपदंतोन्यपतनो पश्चस्याद्देवलीसुतः। इत्येते मनुना प्रोक्ताः कांडपृ
ष्ठाश्च ते स्मृताः। मासोपवासादिव्रतैर्विप्राराधनपरा विधवा देवली तस्यां सवर्णाद्यप्रजातो देवलीसुतः। निस्त्रीणां पद्द्विजः स्वतंत्रैवेश्यपतित्वं प्रजेत दि
ग्धकाह नारदः। तस्यामेव तु यो ज्ञानो ब्राह्मणो रमते रसात्। कांडपृष्ठः स्मृतो मार्गात्सोपाङ्क्तेयः प्रकीर्तितः। देवलः। वेश्यापतिः कुलस्य पृष्ठः कांडपृ राम·
३८

क्षामटो भवेत्। किंच। एकस्मा कथिकूलम एष इति। अथ वैडालव्रतिकादीनां वैडालव्रते श्लोभिदाः। मनुविष्णू। धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदं
भिकः। वैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसंधकः। यस्य धर्मध्वजो नित्यं सुराध्वज इवोच्छ्रितः। प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतं। यमः। यः का
रणं पुरस्कृत्य व्रतचर्यां निषेवते। पापं व्रतेन प्रच्छाद्य वैडालं नाम तद्व्रतं। अथर्ववेद विष्णुलं गृह्य हित्वा लिंगं निवर्तयेत्। आश्रमांतरितं तैर्वैडा
लं नाम तद्व्रतं। अन्यायेनार्थं गृहीत्वा राजादिभया सर्वाश्रमलिंगं हित्वा मान्वत्पयत्याघा श्रमकृतं रक्षतीत्यर्थः। प्रतिगृह्याश्रमं यस्तु स्थित्वा तत्र न
तिष्ठति। आश्रमस्य तु लोपेन वैडालं नाम तद्व्रतं। दत्वो दत्वोदकेन कन्यां तु कृत्वा वैवप्रतिग्रहं। कृतार्थो नार्थवान्यस्य वैडालं नाम तद्व्रतं। यो
वृद्धं वयो गपाय कन्यां दत्वा कृतार्थो पिता मन्यते स्मे दिव्युर्नार्थवानकृतार्थ इवायश्च नित्यकृत्यायालेष्वपि गृह्याप्यनुष्पन्न कृतार्थ इव। यतीना
माश्रमं गत्वा प्रत्यवस्य तु यः पुनः। यतिधर्मविलोपेन वैडालं नाम तद्व्रतं। किंच। बौद्धश्रावककौ च पाशुपतपाखंडौ च कापालिको निर्ग्रंथोपि च पं
चरात्रविदितीमे। कौर्मे। बौद्धश्रावक निर्ग्रंथाः पंचरात्रविदो जनाः। कापालिकाः पाशुपताः पाखंडा ये च तद्विधाः। किंच। द्वौ च मिथ्याश्रमौ। स
एव। अनाश्रमी यो द्विजः स्यादाश्रमी वा निरर्थकः। मिथ्याश्रमास्तु ते विप्रा विज्ञेयाः श्राद्धदूषणाः। किंच। एवं देवलकोपि। देवलाः देवार्चनप

श्राद्ध॰टी॰ ३९ 39

रो विप्रो विज्ञाथीवत्सरत्रयं। असौ देवलको नाम हव्यकव्येषु गर्हितः। किंच। अगारदहनो द्वेधा त्रिधरणपदा ह्युक्तः। स एव। अगारदाही सज्ञेयः प्रेतद
ग्धा ह्यनेकशः। सवाप्यगारदाही स्याद्घोद्धेषोद्वेश्मदाहकः। क्षेत्रसस्यवनानां च दग्धा घोरणपदाहितः। किंच। माहिषको द्विधा कथि। स एव। महि
षीत्युच्यते भार्या सा चैव व्यभिचारिणी। तस्यां यो जायते गर्भः स वै माहिषकः स्मृतः। आत्रेः। महिषीत्युच्यते भार्या सा चैव व्यभिचारिणी। तस्यां यः
त्तमते दोषं स वै माहिषकः स्मृतः। किंच। कारणं संज्ञोऽष्टविक्रयथा देवलः। स वै कारणसंज्ञश्च सकव्यव्यवहारवान्। गोरसानां च विक्रेणं ता
गो विक्रेता च वै द्विजः। गुडलवणतिलानां विक्रेताऽष्टविक्रयी। किंच। स्याद्वर्णव्यतिभेदकः परइतोऽधन्यस्य वार्द्धुष्यथ त्रेधैको पि च गोत्रवाड्वि
क्रान्तश्चैकः। स एव। निकृष्टोत्कृष्टमध्ये यो वर्णोभि न्त्र तव ग्रहः। आचरत्पयराचारं वर्णसंभेदकस्तु सः। एकाकी व्यसनाकीर्तोऽधन्य इत्युच्यते बुधैः
विप्रं वार्द्धुषिकं विद्यान्त्रणवृद्ध्युपजीविनं। यस्तु निंदेत्परं जीवं प्रशंसत्यात्मनो गुणान्। स वै वार्द्धुषिको नाम सर्वकर्मसु गर्हितः। वशिष्ठः। समर्घं धा
न्यमादाय महर्घं यः प्रयच्छति। स वै वार्द्धुषिको नाम ब्रह्मवादिषु गर्हितः। यः सगोत्रीं समारूढः स विप्रो गोत्रवाड्वेत्। राजप्रेषकरोति त्वं ब्राह्म राम॰
णो धिक्कृतः स्मृतः। किंच। द्विधाहृदितः। उत्राचार्य इति त्वयो निगदितो म्रामर्घधोष्ठकः प्रोक्तः। नारदः। उत्राचार्यः स विज्ञेयो ग्रामे यो बालपा ३९

ढकः। पुत्रादत्वाग्निविघोवा आचार्यो निगद्यते। यो आम्पति आमरवद्विमवार्थमृहे। आतिस्त्वतया विप्रो आमरीमन्निगद्यते। यस्तु दुष्टतपश्च
र्यः सस्तु ढोनामसंज्ञया। किंच। द्वौ च निराकृती अथ कदर्यौ द्वौ तथा घांटिकः। कर्मप्रदीपे। यस्त्वाध्यायामिमालस्यादेवादीन्नैमिरिष्टवान्।
निराकर्तामरादीनां स विज्ञेयो निराकृतिः। गौतमः। अधीत्य विस्मृतो वेदं भवेद्द्विजो निराकृतिः। देवलः। आत्मानं धर्मकृत्यं च पुत्रदारां
श्च पीडयेत्। लोभाद्यः पचिनोत्यर्थं स कदर्य इति स्मृतः। वृद्धगौतमः। आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयेत्। मोहाद्यः पितरौ भृत्यान्स क
दर्य इति स्मृतः। उशनाः। राज्ञः प्रबोधसमये घंटाशिल्पस्तु घांटिकः। किंचा वास्तुदुष्टस्त्वथ नास्तिकस्त्वथ दुरालानो द्विधा। कात्यायनः। उंका
रेकासनं चैव लोके यच्च विगर्हितं। अनुकुर्याद्नुब्रूयाद्वा दुष्टं संतं विवर्जयेत्। यमः। परद्रव्यापहर्तारः स्तेनाः सुब्रीस्त्वणाधमाः। डः प्राप
णानु देहस्य दुरालाना हिते स्मृताः। ये व्यपेताः स्वकर्मभ्यस्ते नास्तिकाः प्रकीर्तिताः। हारीतः। येद्विषं बद्धभिः पापैश्छादयंति नराधमानां या
डः प्रापणानु देहस्य दुरालाना हिते स्मृताः। अथ पतितानाह आघोदशाघोव्यंते पतिताश्च। उशनाः। असमानां याजकाश्च स्तुतिविक्रपि
काश्चये। अन्यपूर्वीप्रजाताश्च पतितान्मनुरब्रवीत्। शूद्रस्या पतिताश्च। उशनाः। अध्यापना द्विप्रः पततत्र न संशयः। देवलः। भृतीका

श्रा॰ द॰ टी॰
४०

40

ध्यापकोयश्च भृतकाध्यापितश्च यः। ताउभौ यतितौ विप्रौ स्वाध्यायकापविक्रयात्। गार्ग्यः। सोदर्ये तिष्ठति ज्येष्ठे कुर्याद्यो दारसंग्रहं। आवसथ्यं तथा
धानं पतितस्तु तथा भवेत्। वायुपुराणे। आत्मार्थं यः पचेदन्नं न देवातिथि कारणात्। नार्हंतपक्वमपि श्राद्धं पतितो ब्रह्मराक्षसः। अथ षंढानाहु
पंढविभिदा घोढा। देवलः। षंढको वातजः षंढः पंडः क्लीबो नपुंसकः। कालकश्चेति षंढोयं षंढभेदो विभाषितः। तेषां स्वाल्पेवं लक्षणानि मूले दे
यानि। नग्ना नव। भृगुः। नग्नः स्यान्मलवद्वासा नग्नः कौपीनकेवलः। विकच्छोत्तरीयश्च द्विकच्छो ऽवस्त्र एव च। नग्नः काषायवस्त्रः स्यान्नग्नश्च
श्चार्धपटः स्मृतः। द्विकच्छः परिहितवस्त्रार्धकृतपरिकरबंधः। ब्रह्मवैवर्ते। सर्वेषामेव भूतानां त्रयी संवरणीयतः। ये वै त्यजंति तां मोहात्ते
नग्नाः प्रकीर्तिताः। अथ परिवित्त्यादीनाह वोचान्यो परिवेत्तृसंज्ञः परिवित्तिर्वाथ पर्याहितः पर्याधातृसुतः परीः षिपरियष्टारो न शश्वाइमे।
देवलः। ज्येष्ठे चाप्यनिविष्टे च ज्येष्ठस्यानुक्रमं पयः पुनः। विंदेत परिवित्तिश्च परिवेत्ता च ताउभौ। तौ ज्येष्ठवेत्तारौ। याज्ञवल्क्यः। आवसथ्य
मनाद्दत्यत्रेतायां यः प्रवर्तते। सोनाहिताग्निर्भवति परिवेत्ता तथोच्यते। लोगाक्षिः। सोदर्ये तिष्ठति ज्येष्ठे योग्न्याधेयं करोति हि। तयोः पयो
हितो ज्येष्ठः पर्याधाता कनिष्ठकः। प्रसंगात्कचित्परिवित्त्यदोषापवादमाह नारदः। परिविंदतः परस्तुतान्सापत्नदेशांतरस्थान्मूका

राम॰
४०

न्मषिसक्तराजपरं तेन्नावर्थं हृष्टौ घरं। भिनानानाङ्गदवामेनेक वृषणां धान्कामतोकारिणो वेश्यासक्तपितृव्यपुत्रबधिरान्धइदैः समानो नेष्टि
कान्। रुग्णोन्मत्तविरक्तभिक्षुकुहकान्त्वंजानयोनाग्निकान्नक्तांश्चव्यसनेथकृत्रपतितनक्लीबातिहृद्धान्नृउरान्। कात्यायनः। देशांतरस्थ
क्लीबैकवृषणानसहोदरान्। वेश्यातिसक्तपतितशूद्रतुल्यातिरोगियाः। जडमूकांधबधिरकुब्जवामनषण्डकान्। अतिवृद्धानभार्यांश्च सक्त
पिसक्तान्नृपस्यच। धनवृद्धिप्रसक्तांश्च कामतोकारिणस्तथा। कुहकांस्तस्करांश्चापि परिविंदन्नदुष्यति। अभार्यानैष्ठिकाः। नृपस्य परतंत्रान्।
कुहकावंचकाः। कामतोकारिणो वृद्धिपूर्वमकृतविवाहाः। यमः। पितृव्यपुत्रान्सापत्नान्परपुत्रांस्तथैव च। दाराग्निहोत्रधर्मैः परिविंदतः।
शातातपः। क्लीबे देशांतरस्थे च पतिते भिक्षुके पि वा। योगशास्त्राभियुक्ते च न दोषः परिविदने। भिक्षुकोयतिः। योगेति विरक्तः। सुमंतुः। व्यसना
सक्तचित्तोवाना स्तिको वाथ वाग्रजः। कनीयान्धर्मकामस्तु आधानमथकारयेत्। स्मृत्यंतरे। उन्मत्तनागरुदावष्टुकौ। अत्रविवाहायेप्यपत्नी
वादिषुसघएव परिविंदन्नदुष्यः। कालांतरे संभाव्यविवाहाविरक्तवेश्याक्तविधनवृद्धिसक्तशूद्रतुल्यराजाधीनकामतोकारिकुहकस्ते
नस्नावत्प्रतीक्ष्यायावताकालेनतत्स्वभावत्वनिश्चयाद्विवाहानर्हत्वं परिच्छिद्यते। देशांतरस्थः तु विद्याधर्मार्थार्जनादिस्वार्थसिद्धावपित्र

श्राद्ध॰टी॰ त्यागमसंभावनानिवृत्त्यवधि। एतदुपलक्षणार्थं द्वादशेवत्सरे वर्षाणि ऽपायान्धर्मार्थयोर्गतः। न्याय्यः प्रतीक्षितुं भ्राता श्रूयमाणः पुनः पुनरित्या
४१ दिस्मृतिषु षष्टादशाद्वादशवर्षोपादानं। आधानं केषांचिदाज्ञया कार्यं न तद्दाह इत्याह आज्ञातस्तु पितामहस्य च पितुर्ज्येष्ठस्य चोक्ता हि तिः स्याद्
दाहविधिस्तु शर्वजन्मकृताज्ञातो पितुः श्रेष्ठो मतः। उशनाः। पिता पितामहो यस्य अग्रजो वाप्यनग्निमान् तपोग्निहोत्रमंत्रेषु न दोषः परिवेदने। पित्रा
द्यनुज्ञातस्येति शेषः। मनुः। ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव कारयेत्। अनुज्ञातस्तु कुर्वीतेति। तथा अनुज्ञातस्य पित्रा तु आधानं सर्वदा भवे
त्। हारीतः। सोदराणां तु सर्वेषां परिवेत्ता कथं भवेत्। दारैस्तु परिविद्यंते नाग्निहोत्रेण नेज्यया। अग्निहोत्रमाधानं तत्राज्ञया न दोषः दारैस्तु नाज्ञ
यापि दोषइत्यर्थः। अथ श्राद्धे प्रशस्तविप्रानाह श्राद्धे श्रोत्रिय एव मोऽप्युक्तवाप्यर्हत्तमो मंत्रविद्वेदार्थज्ञस्सहस्रतोऽधिकतमः श्रोत्रियः यथाविधि
स्वशाखाध्यायी। अर्हत्तमः कुलशीलविद्याधरः। मनुः। श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः। अर्हत्तमाय विप्राय तस्मै दत्तं महाफलं। अर्हन्न
मसहस्राणामनृचां यत्र भुंजते। एकस्तान्मंत्रवित्प्रीतः सर्वानर्हति धर्मतः। अनृचां वेदार्थविदां। किंच। अथो वेदशास्त्रार्थवित्। सभ्याः शीलयु राम॰
ताः। गौतमः। श्रोत्रियान्वाग्रूपवयःशीलसंपन्नान्युवभ्यो दानं प्रथममेके पितृवत्। वाक्संपन्ना वेदशास्त्रविदः। रूपसंपन्नाः सभ्याः। वयःसंपन्नाः ४१

पक्वाशयाः। प्रथमं नवश्राद्धे। मुख्यकल्पो वा एके पितृवत्। पित्रादित्रयस्य क्रमाद्गुवस्थविरस्थविरतरा इत्यर्थः। तदाह नवे श्रुत्वा नोऽन्यत्र पकाश
यायद्वा श्राद्धे इहाखिले पितॄणां मुख्याः परेऽसंभवे। पित्रादिक्रमतोऽपरे तरुणान् वृद्धातिवृद्धान्विदुः। किंच। साधुं प्रव्रजितं गृहस्थमविकर्मस्था
न शिष्यानपि। वशिष्ठः। पितृभ्यो दद्यात्सर्वेषु ब्राह्मणान्संनिपातयेत्। नीन्गृहस्थान्साधून्परिणतवयसोऽविकर्मस्थान्श्रोत्रियान् शिष्यानन्तें
वासिनः। यत्पला भे गृहस्थाः। साधुलक्षणमुक्तं। अपरीति। नातिवृद्धान्। अवीतिनिषिद्धवर्जकान्। अंतेवासी सेवकः। कात्यायनः। ज्ञानकानेके
यतीन्वा गृहस्थसाधूनाग्वा श्रोत्रियान्वृद्धाननवद्यान्स्वकर्मस्थानभावे पि शिष्यान्सदाचारान्। वृद्धा विद्यातपोभ्यां श्रेष्ठाः। अनवद्यामातृतः पितृतश्च
निर्दुष्टाः। स्वकर्मस्थाः स्वाश्रमोक्तकर्माणः। तदाह अन्यासंभवतस्तान पि सदाचारान्तथा सेवकान्निर्दोषान्। त्पातृतः स्वकर्मनिरतान्विद्यातपोवृद्धका
न्। तान्शिष्यान्। पितृत इत्यनेकशोधान्मातापि। किंच। ज्ञांतान्नातिजरावतः समगुणोऽश्रेष्ठतार्धकान्तुल्पावेतु ततोऽपि वनितिक्रमशतान्श्रेष्ठायतद्वु
कुर्वीन्। ज्ञांतान्द्वंद्वः खसहिष्णवः। शुचिर्वान्यांतरभोचवान्। यमः। वेदविद्याव्रतस्नाताः श्रोत्रिया वेदपारगाः। स्वधर्मनिरताः ज्ञांताः क्रियावंतस्त
पस्विनः। तेभ्यो हव्यं च कव्यं च प्रशांतेभ्यः प्रदीयते विद्यावेदार्थविचारः। श्रोत्रिया नित्यं वेदाभ्यासपराः। शांता अक्रोधनाः। आपस्तंबः। तुल्पगुणेषु वयो

वृद्धः श्रेयान्स्वाध्यायशास्त्री। किंच। वेदाधीतिमताश्च संपतिमतः। आपस्तंबः। शुचीन्मंत्रवतः सर्वकृत्येषु भोजयेत्। मंत्रं वंतोधीतवेदाः। पैठीनसिः। प्रयतायस्त्रवयेसर्वत्र
देयं हव्यं कव्यं च। प्रयतः संयतः। केचिद्यथा कन्यातथाह विरिंचिकेः कन्यादान इव स्वशाखीय एवोक्तगुणः श्राद्धे इत्याहुः। तन्मतमाह केचित्स्वशाखी
यमेवोक्तं श्रोत्रियतादिसद्गुणविशिष्टं श्राद्धयोग्यं विदुः। कन्यार्हो हविरर्ह इत्यपि विदुः। आर्यावर्ते विज्ञाते न्यशाखीये पि कन्यादानदर्शनादविज्ञाते स्वशाखी
येप्यदर्शनान्नैतदित्याह नैतद्द्वयं संमतं हेमाद्रेः। किंच। अथ नित्यं वेदे निरतान्शांतान्। किं यावत्तरान्। एते यमोक्ताः। किंच। पंचाग्नि त्रिसुपर्णकत्रिमधुसंज्ञा
न्वेदविद्याव्रतस्नातान्ब्रह्मविदं गावित्यिदपरान्ब्रह्मदेयानुसंतानान्। पंचाग्निसहितान् सभ्यावसथ्यवतान्। यजुर्वेदविधानतद्व्रतवान्वा। त्रिसुपर्णकरूपर्ग्वेकदेशात
दध्ययनांगव्रतवान्। त्रिमधुस्तदाख्यऋग्वेदैकदेशतद्व्रतवान्। ब्रह्मदेयाब्राह्मविवाहोढातत्सुतः। याज्ञवल्क्यः। अग्र्याः सर्वेषु वेदेषु श्रोत्रियो ब्रह्मविद्युवा। वे
दार्थवित्ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णिकः। कर्मनिष्ठास्तपोनिष्ठाः पंचाग्निब्रह्मचारिणः। पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसंपदे। यमः। आत्मविद्यां
विदैव ब्रह्मदेयासुतस्तथा। किंच। ज्येष्ठसामा त्रिपर्णाश्च बह्वृचयजुर्विद्ब्रह्मशीर्षानथर्वज्ञान्। ब्रह्मशीर्षमथर्वोपनिषदेकदेशस्तद्वित्। यमः। बह्वृचोयजुःशिष्टो
पर्णीच्छंदोगो ज्येष्ठसामगः। पंचाग्निर्वा यजुर्वेदी त्वथर्वा ब्रह्मशीर्षकः। किंच। ऋग्यजुरथर्ववेदवित्रयफलं स्यात्त्रैकतः सामगात्। पित्रादिकिं मतश्चैव बह्वृचस्तु खान्

42

बृहस्पतिः। यद्येकं भोजयेछ्राद्धे छंदोगं तत्र भोजयेत्। ऋचा तु तृप्यति पिता यजुषा च पितामहः। पितुः पितामहः साम्ना छंदोगोभ्यधिकस्ततः। किंच। पित्र्ये
विड्ःसामगं दैवे वह्वृचकं यजुर्विदमथो पुष्ट्यर्थं आथर्वणं। शांतौ। यमशातातपौ। छंदोगं भोजयेछ्राद्धे वैश्वदेवे च वह्वृचं। पुष्टिकर्मणि चाथर्वं शांतिकर्मण्यथ
र्वणं। अध्वर्युं यो जपो न विद्धः। किंच। भाष्यविदश्च शाब्दिकपुराणज्ञांश्च सत्यव्रतान्स्नातांश्चावभृथे पुतीर्थनिवहे स्वाध्यायजाप्यपरान्। ब्रह्मांडे। ये च भाष्यविदः
केचिद्ये च व्याकरणे रताः। अधीयानाः पुराणं ये धर्मशास्त्रं यथापि वा। ये च पुण्येषु तीर्थेषु कृतस्नानाः कृतश्रमाः। मखेषु ये च सर्वेषु भवंत्यवभृथप्लुताः। ये च
सत्यव्रता नित्यं तान् श्राद्धेषु नियोजयेत्। किंच। योगज्ञांश्च कुलान्वितार्कशिवभक्तान्मंडलब्राह्मणाभिज्ञान्पौरुषसूक्तवेत्तृ विजितात्मज्ञातवंशानपि। ब्रह्म
ण्यान्। अथर्वेस्त्ववांश्च शतरुद्रीयजाप्यपरान्। मात्स्ये। आथर्वणो वेदविद्बज्ञातवंशः कुलान्वितः। पुराणवेत्ता ब्रह्मण्यः स्वाध्यायजपतत्परः। शिवभक्तः पितृप
रः सूर्यभक्तोथ वैष्णवः। ब्रह्मण्यो योगविच्छांतो विजितात्मा च शीलवान्। मंडलब्राह्मणज्ञा ये ये सूक्तं पौरुषं विदुः। शतरुद्रियजाप्येषु निरता यत्रीजपिनोष्ट
पंक्तिमिति विद्यानां च पारंगतानेकस्याश्चपि संस्कृतांश्च नियमैश्चांद्रैः पराकैरपि। वार्हस्पत्यनयेतिहाससविदस्तुष्टामानिसद्भिर्मतः। मात्स्ये। गायत्रीजप्यनि
रतं हव्यकव्येषु योजयेत्। ब्राह्मे। षडंगविद्याज्ञो योगी यज्ञतत्वज्ञ एव च। अयाचिताशी विज्ञेयः श्राद्धकाल्यविदेव वा। अष्टादशानां विद्यानामेकस्याश्चापि पारगः

श्राद्ध-टीका- वाद्रायणैः परार्कैर्वा नियमैर्यश्च संस्कृतः। बार्हस्पत्यं नीतिशास्त्रं शब्दविद्यां च वेत्ति यः। वक्ता नात्र किमुक्तेन इतिहासपुराणवित्। किंच। दांता नित्यमबाध
४३ नानवपलान्साधुस्तु हृष्टानपि सर्वप्राणिहितानुसारते। अबाधनाश्च चपलाः ह्लानां दातां जितेंद्रियाः। अक्रोधनाः कर्मपराः संतोतितथं दमे रताः। तादृशाः
साधवो विप्रास्तेभ्यो दत्तं महाफलं। अमानिनः सर्वसत्त्वसुहृदश्च विजितेंद्रियाः। सर्वभूतहितामैत्रास्तेभ्यो दत्तं महाफलं। अलुब्धाः शुचयो वैद्याः श्रीमंतः स
त्यवादिनः। किंच। धृणिव्रतकृशा क्षान्ता सर्वे महात्मैत्रान्शीलवतो खिलाश्रमगतांश्चैकांतशीलानपि। घृणादयान्तु। नक्षत्रमंत्रेयस्यासा वल्ल्याप्रा
43
न्तः। ब्रह्मवैवर्ते। अल्पस्नानं घृणिक्लांतं कन्नाशवत्तिमयाचकं। एकांतशीलं श्रीमंतं सदा श्राद्धेषु भोजयेत्। तथा। पत्नीपुत्रसमायुक्तान् श्राद्धकर्मणि योजयेत्।
नं दिशु राणे। चत्वार आश्रमाः पुण्याः श्राद्धे दैवे तथैव च। किंच। पत्नीपुत्रवतः प्रतिग्रहनिवृत्तान् स्वल्पतुष्टानकल्मात्। तत्रैवा श्राद्धे देयं तु विप्रेषु संयतेष्वग्निहोत्रि
षु। अकल्कः स्वल्पसंतुष्टः प्रतिग्रहविवर्जितः। किंच। सोपर्णिपरोपकारपरः दृष्टान्नान्नपृष्टच्छकान्। नीत्येतत्परनाचिकेतमपि च द्रोणस्य धर्मोत्तरस्याध्येतृनपि
चाग्निहोत्ररतसद्यःस्नातकान्। नागरे। त्रिणाचिकेतः सौपर्णी धर्मद्रोणस्य पाठकः। सद्यः प्रक्षालकोयश्च परोपकरणेरतः। दृष्टान्नोष्टवांछुश्च सदाजपपराय राम-
णः। एते वै ब्राह्मणा ज्ञेयाः निःशेषाः श्राद्धसिद्धये। किंच। श्राद्धया। देवार्चा निरताञ्छ्रिलोञ्छनिरतान्वेदांतनिष्ठानपि स्मृत्यध्येतृगुरूत्तर्वितकस्तुपात्र श्री ४३

त्रियात्मोङ्गवान्।सुपात्राणि च श्रोत्रियात्मोङ्गवान् श्चेति विग्रहः।बृहस्पतिसंहिता।अंगिरोनारदभृगुबृहस्पत्युदिताः स्मृतीः।पठति ये श्रद्दधाना ये
मियोऽपाः प्रयत्नतः वेदांतनिष्ठाः श्राद्धेषु व्याख्यातारो विशेषतः।प्रचेताः।दांतश्च मातृभक्तश्च श्रद्धया देवपूजकः।शिलोंछनादिवृत्तिश्च श्रोत्रियस्य
सुतस्तथा।एते विप्रा महापुण्याः हव्यकव्येषु चाश्रिताः।यमः।नक्षत्रतिथिपुण्याहान्मुहूर्तान् मंगलानि च।न निर्दिशंति ये विप्रास्ते मुक्तांस्पत्त्रयं भवेत्।सं
र्त्तिः।प्रयत्नाद्धव्यकव्यानि पात्रेष्वेते द्विजन्मनि।प्रतिष्ठाप्यानीति॥केषांचित्पुंदासमाह वेदाध्यापकशिल्पशास्त्रगुरुसंबंध्येकगोत्रैः सपिंडैस्तुल्यप्र
वरैर्विनेति गदिताः शस्ताश्चेह ब्राह्मणाः।कौर्मे।असमानप्रवरकोऽन्यसगोत्रस्तथैव च।असंबंधी च विज्ञेयो ब्राह्मणः श्राद्धसिद्धये।गारुडे।श्राद्धेषु वि
नियोज्याः सुब्राह्मणा ब्रह्मवित्तमाः।येयोनिगोत्रमंत्रांतेवासिसंबंधवर्जिताः।योनिसंबंधा मातुलाद्याः।गोत्रसंबंधाः सपिंडाद्याः।मंत्रसंबंधा अ
ध्यापकाद्याः।अंतेवासिसंबंधाः शिल्पशास्त्रोपाध्यायाः।इति प्रशस्तब्राह्मणाः।अथ पाङ्क्तेयानाह पाङ्क्तेया अथ धर्मशास्त्रविदथो यो वेदवेदांगवि
त्पंचाग्निस्त्रिसुपर्णकस्त्रिमधुकोज्येष्ठसामप्रगः।सान्वावामकसांख्ययोगविदथर्वात्रिणाचिकेतो मातापितृसेवकोपनिषदर्थज्ञोस
दाग्निस्तथा यः सश्रोत्रियवेदतत्परस्तताधाता च योगे स सांख्ये चाथोपनिषत्सु च स्मृतिषु चाथो धर्मशास्त्रप्रियः।शंखलिखितौ।अथ पांक्तेयाद

श्राद्धटीका
४४

44

दवेदांगवित्पंचाग्निरन्वाचाममंत्रविद्योगपतिषड्धर्मशास्त्रविच्छ्रोत्रियस्त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णोऽपेष्ठसामगः ॥ सोऽथ योनिगोपतिषड्धर्मशा
स्त्राध्यायी वेदपरः सदाग्निको मातृपितृशुश्रूषुर्धर्मशास्त्ररतिः ॥ किंच ॥ षडंगेद श्रुतवांस्त्रयोदशविधं शीलं गतः प्राप्तवान्नेमं षोडशधा वृत्तः कुलगु
णोर्युक्तश्च सत्यव्रतः ॥ अव्यंगोऽपि ॥ हारीतः ॥ स्थितिरविछिन्नवेदवेदितात्रयोनिसंकरित्वमार्षेयत्वं चेति कुलगुणाः ॥ वेदो वेदांगानि धर्मोऽध्यात्मं विज्ञा
नं स्थितीरिति षड्विधं श्रुतं ॥ ब्रह्मण्यता देवपितृभक्तता सममता सौम्यताऽपरोपतापिताऽनसूयता मृदुताऽपारुष्यं मैत्रता प्रियवादित्वं कृतज्ञता शरण्य
ताप्रशांतिश्चेति त्रयोदशविधं शीलं ॥ क्षमा दमो दया दानमहिंसा गुरुशुश्रूषा शौचं स्नानं जयो होमस्तपः स्वाध्यायः सत्यवचनं संतोषो दृढव्रतत्वं
उपव्रतित्वं चेति षोडशगुणो वृत्तं ॥ तस्मात्कुलीनाः श्रुतवंतः शीलवंतो वृत्तस्थाः सत्यवादिनो व्यंगाः पंक्तेयाः ॥ स्थितिः संततपात्मनाचिरं ॥ प्रवरज्ञता
र्षेयता ॥ धर्मः स्मृतिः ॥ अध्यात्ममात्ममीमांसा ॥ विज्ञानं न्यायः ॥ स्थितिः पुराणं ॥ ब्रह्मण्यो ब्रह्मणि साधुः ॥ समो रागद्वेषः ॥ सौम्योऽजनतुद्घः ॥ मृदुर
कठितः ॥ परुषः कलही ॥ मैत्रः प्रसन्नमनाः ॥ शरण्यः त्राणे साधुः ॥ विद्याद्यतत्सेकः प्रशांतिः ॥ व्यासः ॥ अहिंसा सत्यवचनं ब्रह्मचर्यमकल्कता ॥ अस्ते
यमिति पंचैते यमाश्चैव व्रतितानि च ॥ अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवं ॥ अप्रमादश्च नियमाः स्मृताः पंचैवोपव्रतानि च ॥ किंच ॥ व्रतिसोम

राम
४४

पाविरजसोधर्मज्ञोमैत्रोयजुर्वेदज्ञोनियमस्थवह्न चकऋतस्त्रीगामितोव्रजत्यपि।छंदोगःसामगोप्यथर्वशिरसोध्येताशिखस्थाग्निहोत्रीचांद्रायणकृत्वा
णाविदथोसर्वास्तुविद्यासुयः।निस्नातोगतकल्मषोऋतुऋषिकोगर्भशुद्धोऋषिव्रात्यात्मज्ञसहस्रदोव्रतपरोदेयाद्युतोन्यायवित्।दांतस्थाप्यनमि
त्रकोपिवनचामित्रःशुचिर्योमृदुर्दांतोद्वादशवार्षिकश्चगुरुदेवाग्निप्रश्नजापरः।उक्तःसर्वतएधीरःतयोयोव्रसन्नतोद्विजाग्र्योयोउप्यवलिप्रि
योपिवसदराजप्येरतःस्नानकः।प्रायोयोछपवासकृत्सकृतशास्त्रसोमहस्यश्चजुर्वेदज्ञोपिवधर्मपाठकउमेपांक्त्यविप्रामताः।विरजामंत्रविशेषज्ञरध्याय्य
पिविरजाः।व्रतीब्रह्मचारी अथर्वशिरोथर्ववेदैकदेशः।कृषेःकिंचिद्गुणोपेतोऋषिकइतिकीर्तितइतिउसमंतुः सहस्रादोगोसहस्रदशइतिमेधातिथिः।व्रतप
रादेयास्तुतोव्रतंदेयास्तुतः।अनमित्रःशत्रुहीनः।नचामित्रःनकस्यापिशत्रुः।द्वादशवार्षिकवेदव्रतकृद्द्वादशवार्षिकः।उक्तःसर्वतोकृणत्रयात्।अत्रप्रमा
णांयमस्मृतिर्मूले।अथपंक्तिपावनाहडष्टापंक्तिरपांक्त्यैर्द्विजवरैर्यैःपाव्यतेथाखिलानांक्रमःस्वरूपंक्तिपावनसमाख्यातः।अर्थवादश्चायं।श्रोत्रियाणांकु
लेनिखिलांगवेदनिचयेचाम्नाःशताश्वश्वयःपंचाग्निस्त्रिसुपर्णकस्त्रिमधुकोज्येष्ठसामगः।वेदार्थज्ञषडंगविस्प्रवचनास्त्रीस्नातरोनाचिकेतः।
अग्र्योनिःसंशयंषडंगवेदाभ्यासी।प्रवचनोवेदमाख्यातः।आपस्तंबः।आन्याःसर्वेषुवेदेषुसर्वप्रवचनेषुवाश्रोत्रियान्वयजाताश्चविज्ञेयाःपंक्तिपावनाः

श्राद्ध· त्रिणाचिकेतः पंचाग्निस्त्रिसुपर्णः षडंगवित् ॥ ब्रह्मदेयानुसंतानो ज्येष्ठसामग एव च ॥ वेदार्थवित्प्रवक्ता च ब्रह्मचारी सहस्रदः ॥ शतायुश्चैव विज्ञे-
४५ या ब्राह्मणाः पंक्तिपावनाः ॥ किं च ॥ स्नातत्रयमादिमाश्रमकृशोयो ब्रह्मदेयासुतः ॥ अत्युत्क्रांत इह स्वधर्मनिवहात्सत्री सहस्रप्रदायेव सुः
श्रुतिसंमता व्रतचराह्नस्नाकृशा मंत्रिणः ॥ मंत्रिणो गायत्र्यादिमंत्रजापकाः ॥ यमः ॥ वेदविद्याव्रतस्नाता ब्राह्मणाः पंक्तिपावनाः ॥ व्रतचर्यासु निर-
तायेकृशाः कृशास्त्रयः य ॥ अत्युत्क्रांताः स्वधर्मेष्वपन्ने द्विजाः पंक्तिपावनाः ॥ मंत्रिणो नियमस्थाश्च ये विप्राः श्रुतिसंमताः ॥ मंत्रिण इति वा पाठः ॥
45 किं च ॥ विद्वांसः क्षमिणो नसूयकस्तु शांताः प्राणिहिंसानिवृत्ता साम्नायजुषां च पारगताथो ब्रह्मदेयापतिः ॥ दातास्पानियमी प्रतिग्रहनिरा-
श्चाग्निहोत्रे रता योगी तुल्यसुवर्णलोष्टदृषदो ध्यानशीलो यतिः ॥ यमः ॥ प्राणिहिंसानिवृत्ताश्च ये द्विजाः पंक्तिपावनाः ॥ अग्निहोत्ररताः शांताः क्षमावंतो
नसूयकाः ॥ ये प्रतिग्रहतिः स्नेहास्ते द्विजाः पंक्तिपावनाः ॥ विद्वांसुव्रताः शांता ब्राह्मणाः पंक्तिपावनाः ॥ शंखः ॥ ब्रह्मदेयानुसंतानो ब्रह्मदेयाप्रदायकः ब्र-
ह्मदेयापतिर्यश्च ब्राह्मणा पंक्तिपावनाः ॥ यजुषां पारगो यश्च साम्नां यश्चापि पारगः ॥ अथर्वशिरसोध्येता ब्राह्मणाः पंक्तिपावनाः ॥ नित्यं योगपरो राम·
विद्वान्समलोष्टाश्मकांचनः ॥ ध्यानशीलो यतिर्विद्वान्ब्राह्मणाः पंक्तिपावनाः ॥ किं च ॥ स्वंकर्मारह यत्रपाथर्वशिरसोध्येताग्निचित्सोमपा धर्मज्ञोप- ४५

भयत्नयस्य वृद्धश्च श्रोत्रियाः स्नातवित्ता। अध्येता च शिरस्त्वयस्य ज्ञाठगामी रुद्रजाप्यूर्ध्वरेताः पंक्तिं पुनन्ति सहस्रं तु रुपं ग्राम्ताः शमाघत्विताः। तिपंचाग्नि
सुवेदेषु णोर्थदिष्टतालक्षं पुनीतेनृचां पंक्तिं योजनविस्तृतां स्वपरितोपि त्रिसुपर्णो ज्ञानपुनः। शिरस्त्वं पंरुद्रशिरः वैश्वानरशिरोथर्वशिरः धर्मज्ञस्त्रयी धर्मि
ज्ञेः। देवलः। स्वकर्माद्युः स्थिता विप्राः स्वपंक्तिं पावयंति हि। अग्निवित्सोमपाश्चैते ब्राह्मणाः पंक्तिपावनाः। क्षत्रपञ्चुः सामधर्मज्ञाः स्नातकाश्चाग्नि
होत्रिणः। हारीतः। दशो भयतः श्रोत्रियास्त्रिशीर्षा रुद्रजाप्यूर्ध्वरेतास्त्रिणाचिकेताग्निरामा तत्त्वविच्चेति पंक्तिपावना भवंति। सहस्रसंमितं प्राहुः स्नात
कं पूर्ववदुत्ताः। पंचाग्निदिष्टणोर्थुक्तः शतसाहस्रमुच्यते। अन्तर्वायदिवाह्नत्स्नां पंक्तिं योजनमायतां पुनाति वेदविद्विप्रो निश्चकः पंक्तिमर्हति किं
च मंत्रज्ञो विनियोगवित्। तथ चतुर्मेधा श्रमन्यो भवेत्कश्चिद्वाजसनेयको व्रतवरो नूचान एवोपि वा। चतुर्मेधाः चातुर्मास्ययाजी गोतमः। पं
क्तिपावनाः मंत्रविद्ब्राह्मणाविद्धर्मज्ञ इति वशिष्ठः। चतुर्मेधा वाजसनेयी ती। पैठीनसिः। वार्णव्रतश्छंदोगो ज्येष्ठसामगो वेदाध्याप्यनूचानपुत्र
इति। किंच। चारित्रं त्वथ पंचपुरुषमखंडं यस्य यस्याविच्छिन्नं धर्माध्ययने च वर्षशतकं मंत्रादितः पारगः। ज्ञान्यपि पाद्यब्रह्मतापिपः प्रवचने। छंदोवि
शुद्धाः पुमांसोयस्यापि दश। उशनाः। पंचपुरुषपारंपर्याविखंडितचारित्रमर्यादस्त्रिणाचिकेतस्त्रिसुपर्णोग्निर्विज्ञेष्ठसामगः श्रतवर्षी

श्राद्ध· उक्तधर्माध्ययनोमंत्रब्रह्मतिज्ञाप्यप्रवचनपारगःऋतुकालाभिगामीछंदसांसुब्रह्मण्यःस्नातकइतिपङ्क्तिपावनाः।किंच।एककस्यचरणतःपारं
४६ षडंगस्ययः।व्याकरणाद्यइतिहासस्यकस्यचपुराणस्यापिपारंगतश्चैकस्याअपिचस्मृतेयजिनपोज्ञानवंतीर्थैरपि।स्मृताः।ज्ञानंचआत्मंचेतिविग्रहः
विष्णुः।अथपंक्तिपावनावेदांगस्याप्येकस्यपारगःपुराणेतिहासव्याकरणपारगोधर्मशास्त्रैकस्यापिपारगस्तीर्थस्नातोयज्ञव्रतस्नपःपूतःसत्यव्र
46 तोदानव्रतोज्ञाज्ञामातादौहितृश्चेति।किंवापारगताश्चतुर्दशसुयेविद्यासुकस्याश्चिदप्येकस्याइहितुःसुताश्चपतयोवेदस्यभाष्येरताः।गा
यत्रीजपिवेस्सवावपिपठेयःश्राद्धकल्पेपिइदीलंतुभोक्तुमपीहयेपिचमहादेवार्चनेतत्पराः।तदेवैकेपरायणाः।ब्रह्मांडे।षडंगविज्ञानयो
गीसर्वतंत्रस्वथैवच।यायावरश्चपंचैतेविज्ञेयाःपंक्तिपावनाः।सर्वतंत्रःशालीनः।येभाष्येवैदिकेकेविधेवव्याकरणेरताः।चतुर्दशानांवि
द्यानामेकस्याअपिपारगः।श्राद्धकल्पंपठेद्यश्चसर्वेतेपंक्तिपावनाः।कौर्मे।महादेवार्चनरतोमहादेवपरायणः।वेदस्वेवावाथयोनित्यंस
विप्रःपंक्तिपावनाः।।किंच।गुणागणैःश्वेदित्रैर्योयुतःशारीरादपिपंक्तिदूषणागणान्नोदूष्यतांमत्रजेत।येविप्राअपिशंसितव्रतगणाः राम·
संस्कारकर्मणिपथोजानानाइतिपंक्तिपावनागणाःशालीनयायावरौः।वशिष्ठः।अथचेन्मंत्रविद्युक्तःशारीरैःपंक्तिदूषणैः।अदूष्यंतंयमः ४६

ग्राहपंक्तिपावन एव सः। मंत्रवित्वं सगुणत्वोपलक्षणं। गार्ग्यः। दांतं मोक्तुं च ज्ञानं तिये विप्राः शीमितव्रताः। संस्कारकर्मविज्ञानसंपन्नाः पंक्तिपा
वनाः। अथ पंक्तिपावनपावनानाह ज्यंते यत्तु पंक्तिपावनसमाख्याः पावनांता द्विजायः साक्षाद्विदितात्मतत्वज्ञतयो मीमांसते चाध्वरं। वाचं व्याकु
रुते वयः स्वरविधिं साम्नश्च जानाति यो यज्वाज्ञां तिदमेश्च शांतिस्तु तपो वीतस्पृहैर्वृतः। वेदांगज्ञतया च योथ समदृष्ट्या सत्यवादित्वतो धामत्वेन वशांत्यलो
लुपतया संतुष्टितः स्व।भ्यतः पुत्रो थो रिपुमित्रयोः समतया स्वर्णाश्मलोष्टेषु वा न द्वेष्टा न च रज्यते॥ इति पंक्तिपावनाः। मनुः। यश्च व्याकुरुते वाचं यश्च
मीमांसते ध्वरं। यश्च वेत्त्यात्मकैवल्यं पंक्तिपावनाः। व्रतलवैवर्ते। वेदवेदांगविद्यज्वा शांतो दांतः क्षमान्वितः। वीतस्पृहस्नपस्वाव पंक्तिपावनपावनः। धी
मानलोलुपः शांतः संतुष्टो येन केनचित्। समदृष्टिः सत्यवादी पंक्तिपावनपावनः। समः शत्रौ च मित्रे च समलोष्टाश्मकांचनः। न रज्यते न च द्वेष्टि पं
क्तिपावनपावनः। किंच। अथ कपि लोके योगशास्त्रे तथा वेदांतेषु पितत्वविन्मथ सुविवेकी तशीलवमी नित्ये ध्यानितया च सर्वहितरत्या वप्रि
योक्त्या युतः। प्रत्याहारपरायणत्वनियमित्वाभ्यां यमैर्युतः सन्नस्पृष्टज्ञत प्रियात्रियतएषोन्योथ मैत्रत्वतः। प्राणायामपरत्वतः करुणाधारत्व
तोध्यात्मधीश्वरतत्वेन युतः। गारुडे। सांख्यशास्त्रार्थनिपुणो योगशास्त्रार्थतत्ववित्। वेदांतनिष्ठबुद्धिश्च पंक्ति। प्रियवादी शुचिर्मौनी सर्वभूतहि

श्राद्ध॰ ४७ तेरतः। एकांतशीलो ध्यानी च पंक्ति॰। यमैश्च नियमैः युतः प्रत्याहारपरायणः। प्रियाप्रियाभ्यामस्पृष्टः पंक्ति॰। प्राणायामपरो धीरो मैत्रः करुण एव च। अध्या
त्मज्ञानपूतात्मा पंक्ति॰। किंच। अथ निंदति च शोचेत् कांक्षति द्वेष्टि न। आत्मारामतया च पूर्णो निजकामो यथात्म नित्ये वयः सर्वं पश्यति तत्त्वजातमिह
वात्मानं च पश्यत्यथाशीतोष्णाशनयानवांछनपूजामोहादिभिर्द्वंद्वैः खेरस्पृष्ट उताग्नि वितः शुचितया चात्मैकतानव्रतः। ॐ मित्येकमक्षरं य
दभिधानं ब्रह्म तद्व्याहारान्नित्यं चाथ तपो यतेंद्रियनिराशीष्टो रकिंचन्यतः। उक्तो ज्ञानचणश्च विज्ञ उत विज्ञानेन। गौरि। यो न निंदति न द्वेष्टि न शोचति
न कांक्षति। आत्मारामः पूर्णकामः पंक्ति॰। यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति। सर्वभूतेषु चात्मानं स वै पावनपावनः। अशनापिपासाभ्यां शी
तोष्णादिभिरेव च। अस्पृष्टः शोकमोहाभ्यां पंक्ति॰। ॐ मित्येकाक्षरं ब्रह्म व्याहरत्यनिशं शुचिः। आत्मैकतानधीर्यो सौ पंक्ति॰। यतेंद्रियस्तपोनिष्ठो निरा
शीरपरिग्रहः। ज्ञानविज्ञानवित्तात्मा पंक्तिः। एतानल्पतमान्संख्ययोपसंहरतितेमा द्विजाः पंक्तेः पावना पावना निगदिता मन्वादिभिः षोडश। अथ श्रा राम॰
द्धे योगिनियोगमाह श्राद्धे योगिनियोगश्च्यतद्रतानष्टां। योगं तथा तत्त्वं द्रष्टवतो मनीषिणः इयाज्ञं जं श्रुतिति पंफलं। अक्षय्यं हि। वृद्धशातातपः। यो ४७
गिनो भोजयेत्रि स्पृष्टतत्त्वान्मनीषिणः। तेषां तु दत्तदत्तमक्षय्यं भवतीति न संशयः। मनीषिणो हेयोपादेयविवेकवत्तः। नित्यमादरेण। योगिब्रशं

साश्वंतिद्भक्तस्य फलं गौरवमाह सवेदवेदनिव यं योवेदपित्र्येकवोपज्ञां श्चैवसवेदयः खलु यजूंषीष्टा दिनो वेदस्तु । शब्दब्रह्म सवेदवेद किलयः सा
मानि सर्वं सवेदात्मानं किल वेदयः । आत्मानं मनतः । ब्रह्मवैवर्ते । ऋचो हियो वेद सवेद वेदान् यजूंषि यो वेद स वेद स यज्ञान् । सामानि यो वेद स वेद ब्रह्म
मंत्रा हियो वेद स वेद सर्वं । किंच । अथ निखिलाब्ध्माप्ताद्विलोकी सदा । योगिषीश्वरतां गतैर्यतद्भमे पश्यंति सर्वजगत्सत्वा द्यापि परं न यं तउतवश्य
व्यक्तमव्यक्तकं । सचासच्च तथोभयं निखिलसत्वं ब्रह्मणा सृष्टमेतेषामीश्वरदर्शनेन खलु मोक्षादानि सृष्टानियत् । तस्मात्तद्भजने परः शुभ
फलं प्राप्नोति तन्मेषवत् । सत्वाद्युद्वेरंतःकरणाद्वापरं परमात्मानं च पश्यंति । व्यक्तं स्थूलं कार्यमव्यक्तं सूक्ष्मं कारणं । एतेषां योगिनां । उन्मेषव
ज्जरोत्तरत्र पचितं । तत्रैव । सर्वयोगाश्वर्यैर्व्याप्तं त्रैलोक्यं हि निरंतरं । यस्मात्पश्यंतितेसर्वयत्किंचिज्जगतिस्थितं । व्यक्ताव्यक्तं वशीकृत्य सर्व
स्याचिवतत्परं । सच्चासच्चोभयं सृष्टं सर्वसत्वं महात्मना । सर्वज्ञज्ञानसृष्टानि मोक्षादानि महात्मनां । तस्मात्तेषां सदा भक्तः प्राप्नोत्युन्मेष
वच्छुभं । किंच । योगेव स्वककर्मभिश्च गुरुभक्त्या कुर्वते योगिनः प्रीतास्तृप्तितरस्तु तेन शशिनं चाप्याययंते ततस्तेन प्रीततरं वजीवतिजग
द्योगाः पितृणां बलं । यो यगेनैव वचसो मतत्रिरिति पित्र्ये योगिनो योजयेद्यत्नात् । तत्रैव । क्रियया गुरुपूजाभिर्योगं कुर्वंति योगिनः । ते न चाप्या

श्राद्धदीपि. यपंते ते पितरो योगवर्धनात्। आप्यायिताः पुनः सोमं पितरोः योगभूषिताः। आप्याययंति योगेन त्रैलोक्यं येन जीवति। पितॄणां हि बलं योगो
४८ योगात्सोमः प्रवर्तते। तस्माच्छ्राद्धानि देयानि योगिनां यत्नतः सदा। किंच। विश्वमियत्तया परिमितं योगो नैवेनादृशः। तस्मात्तादृशमेव तत्प्रतिनि
योगात्पित्र्यमिष्टं फलं कार्यकारणानुरूपमेव हि भवेत्। तादृशमपरिमितं तत्प्रतिनियोगो ऽपरिमितयोगप्रतिनिमंत्रणात्। तत्रैव। तस्मात्सर्वप
48 रिछिन्नं विश्वमेतदियत्तया। अविद्यांतर्गतं योगेन चेयत्ता प्रमामता। तस्मादनंतफलदं प्रदत्तं योगिनां हविः। कारणानुगतं कार्यमिति त्वंमा
न्यथा कृथाः। किंच। विष्णुश्च योगी मतातः। तस्माद्योगविदो नियोक्तुमिहार्हति। आगलेयः। मूर्तं ब्रह्म हरिः साक्षाद्दैत्यारिर्योगवित्तमः। अ
तो योगविदो भोज्याः श्राद्धेषु पितृतृप्तये। किंच। एषु पात्रो पियो ऽघात्तारितवान्कुलत्रयम यं सन्तात्पदकश्चापि सः। वृद्धशातातपः। स्नानाय
स्य गृहे याति उदकं वा पिबेद्यदि। कृतं तेनेह सत्कृत्यपदकश्चापि सः। वृद्धशातातपः। स्नानीयस्य गृहे याति उदकं वा पिबेद्यदि। कृतं तेनेह स
त्कृत्यं तारितं च कुलत्रयं। किंच। योगतत्वविदः समाधिनिरताश्च ज्ञायंते पेटके। आले। षडंगवित् ज्ञानयोगी योगतत्त्वज्ञ एव च। राम.
अपाचिताश्च विज्ञेयः श्राद्धकर्मणि भोजयेत्। किंच। विघ्नस्तिष्ठति मा पेतितत्र च न तः। तत्र श्राद्धे। ततो योगिनियोगात्। छिद्रं व्यंगं वा त्र ४८

ह्मवैवर्ते। वृद्धच्छिद्रः श्राद्धे प्रोक्तः पैत्रो यज्ञो महर्षिभिः। निःप्रत्यूहश्च निश्छिद्रो जायते योगरक्षया। किंच। योगी सहस्रस्य च। भुंक्ते ग्रासमन्नमास्थितो यदि
नियोक्तारं च संतारयेद्दोर्ध्वं श्चैलमहीपतेः पितृगणेगीतात्र गाथाप्रः। मार्कंडेये। ब्राह्मणानां सहस्रस्य योगी त्वग्रासनो यदि। यजमानं च भोक्तृंश्च नौरि
वांभसि तारयेत्। तथा। पितृगाथास्तथैवात्र गीयंते ब्रह्मवादिभिः। योगी तां पितृभिः पूर्वमेलस्य सन्महीपतेः। कदा नः संततावग्र्यः कस्यचिद्भविता
सुतः। यो योगिभुक्तशेषान्नात्भुवि पिंडान्प्रदास्यति। अथ योगिनां सर्वोत्कृष्टत्वमाह योगी सर्वतत्त्वज्ञ मांत्र चतुरो वेदान्हि सांगानधीते यो सौ वक्ष
तार्थवत्सच विशुद्धो जन्मना कर्मणा। स श्राद्धे प्रयतो मतस्त्वेतत्तेषां मतो योगविद्वेयान्। पाद्मे। सांगांश्चतुरो वेदान्यो धीते सकृतार्थवृत्। जन्म
ना कर्मणा शुद्धः स श्राद्धे प्रयतो मतः। तादृशाच्छताच्छ्रेयानेको योगसमाश्रयः। किंच। मूर्खसहस्रतुल्यउदितो वेदार्थवित्स्नातकः। एकश्रेष्ठस्तु सु
मः सहस्रगणितैर्वैखानसानां शतात्प्याघाश्रमभ्रगृहिव्रतिसहस्रात्स्नातकानां शतात्। यश्चैकेन परं स्थितः शतसमाः स्याद्धाभुक्तस्ततो
योगीश्वरतरः। श्राघाश्रमभ्रजोनत्सहितौ। व्रती नानाव्रतवान्। ब्रह्मवैवर्ते। सहस्रशस्तु विप्रान्वै भोजयेद्यान्यथागतान्। एकस्नान्नं विद्वातः
सर्वानर्हति धर्मतः। एतानेव च धर्मज्ञा भोजयेद्यः सहस्रशः। एकस्नात्नातकः प्रीतः सर्वानर्हति श्रावतः। गृहस्थानां सहस्राद्वानप्रस्थशतादपि

श्रा·टी· ब्रह्मचारिसहस्राच्चयोगिरेको विशिष्यते। पञ्चिष्ठेदेकपादेन वायुभक्षः शतं समाः। ध्यानयोगी परस्तस्मादिति ब्रह्मानुशासनं। यथागतान्सर्वान्। संकल्पि
४९ तनानाव्रताः। किंच। अथ नैष्ठिकमस्तु ह्यलाभतो भोजयेत्। तस्यालाभत ईरितं तदुपकुर्वाणं तथान्यान्द्विजान्। कौर्मे। भोजयेद्योगिनं शान्तं तत्त्वज्ञान
परायणं। अलाभे नैष्ठिकं दान्तमुपकुर्वाणकं तथा। भोजयेद्वा यकं वेष्टुअलाभादितरान्द्विजान्। किंच। योगी तस्करकीर्णो नास्तिक विकर्मस्थो प्यसन्ता
49 रयेत्। तद्वियुः पितरोस्य पुत्रतततत्रोपि यो योगिनः श्राद्धे भोजयति। कीर्णः संकीर्णः। वायुपुराणे। नास्ति वा वीकर्मी वा संकीर्णस्तस्करो पि वा।
नान्यत्र कारणं दाने योगिष्वाह प्रजापतिः। पितरस्तस्य तुष्यन्ति सुवृष्टेनेव कर्षकाः। पुत्रो वाप्यथ वा पौत्रो ध्यानिनं यस्तु भोजयेत्। किंच। इहहस्त
गतयोगी त्वाद्दतो नेतरः। ब्रह्मवैवर्ते। येनहृन्ते स्थिता नित्यं ज्ञानिनो ध्यानिनस्तथा। अथ ययोस्पतिक्रमे दोषमाह श्राद्धायोग्यपतिपातकृन्नफल
मेति स्वान्वितस्तुः स्विनः कुर्यात्। आगलेयः। योगिनं समतिक्रम्य गृहस्थं यदि भोजयेत्। न तत्फलमवाप्नोति सर्वं गोत्रं प्रतापयेत्। दातुरेवा
तिक्रमे उक्तं उभयोरप्यतिक्रमाभिप्रायेणाह प्रतिभोजने खुरप्यवेद्दातावभोक्तापि च। तस्यातिक्रमकृन्नदा निरयगो नो द्यो सर्वदा। दाता यं मां भो राम·
जयिता किं योगिना भोक्ताप्ययं मां भोजे पिता किं योगिनेति द्वयोरभिप्रायेण प्रतिभोजनात्क्यो क्तो। स एव। योगिनं समतिक्रम्य भोजयन्ति परस्परं। दाता ४९

मोक्षाचानरकंगच्छतःसहबांधवैः।प्रमादकृतेतिक्रमेआहयदातिक्रांतिःप्रतिभुक्त्विवांछुनस्यतेजातात्प्रमादान्नदा।नोकस्मिन्निरयेयतेद्धिकवलनामात्रं
तुपित्रेभवेत्।अथगृहस्थादीनामपियोगितामाह।गार्हस्थ्योपिचयोगितानविरुणद्धीतिप्रवंपंचोदितं।गार्हस्थ्यग्रहणमुपलक्षणं।कौर्मे।गृहस्थोने
ष्टिकाःशांतावनस्थायतयोपिवा।योगिनःपर्युपासंतेपरमात्मानमात्मनि।अर्थयतेर्नियोगमाहअत्रिःशस्ततरोयतिः।मनुः।ज्ञाननिष्ठेषुकव्या
निप्रतिष्ठाप्यानियत्नतः।ज्ञाननिष्ठायतिः।यत्नोक्तेस्मिन्दभावेत्यत्रापि।इदंप्रशस्ततरोक्तंयोक्तं।यतेःपंक्त्यग्रेभोजनमन्यथादोषमाहसमनुयोऽस्मो
ग्रासनेसोडुतंतस्यहरतेरन्नमोगणः।हरतकलत्रादेर्विनाशंव्रजेत्।यमः।यस्यैवेयजमानस्यनाग्रेभुंक्तेयतिस्तथा।अतिष्ठमनुतंतस्यहरतेरन्नमो
गणः।हरतेआनयति।किंच।विष्णुब्रह्मशिवावसंतितुयतेर्देहे।ब्रह्मवैवर्ते।अहंनारायणोब्रह्मायतिदेहसमाश्रयः।किंच।अथतस्तुजयाषड्गागं
सुकृतस्यतेनविहितस्याप्नोतियोगोजपः।यज्ञश्चेतियतौत्रयंस्थितमतस्त्रयाणिपूजाप्रणाममन्नानिभवंतितस्ययतयेचाघाश्रमायार्पये
नू।आत्मानंफलपुष्पपानखादनीयादीवगेहागृहेयातायाश्यनवाकल्पकोटिशततोपित्रापतेश्रद्धयाददातान्नं।छागलेयः।पूजयेच्चयतिंश्राद्धे
पितृणांतुष्टिकारकं।तत्कृतंसुकृतंयस्यात्रस्मात्सद्गागमाप्नुयात्।जाप्ययोगश्चयज्ञश्चयतस्मिंस्त्रयंस्थितं।तस्यप्रणामःपूजाचदत्तंभवति

वान्नयं।गृहस्थस्य यस्याश्रमं।गच्छेद्ब्रह्मचारी यतिस्तथा।स्वाद्यं पानं फलं शुष्कमात्मानं च निवेदयेत्।यतये वीतरागाय दत्तमन्नं सुपूजितं।न हीयते श्रद्धया
वैकल्पकोटिशतैरपि।किंच।पतिरग्न्युक्तकस्तु योऽपस्थेति हा सान्विता न्वेदान्पश्चात्तुरः पठेन्न दत्तु यस्त्रीस्त्रत्परो हो ऽपः।एकं वेदमधीत्य वा स्ततश्च तः
पश्चादधीयन्निति विषस्याक्रमः।वायुपुराणे।यतिस्तु सर्वविप्राणां सर्वेषामग्रजन्मवेत्।इति।हासपंचमान्वेदान्यः पठेच्च द्विजोत्तमः।अनंतरं य
तेः सोयं नियोक्तव्यो विजानता।त्रिवेदोनंतरस्तस्माद्द्विवेदस्तदनंतरः।एकवेदस्ततः पश्चान्नित्याध्यायी ततः परं।विंच।उत्तमो यतिरत्रापस्यात्रि
कर्माथवा।ब्रह्मज्ञानपरायणाच्छुत्तदलामोऽक्षाष्टहस्याः।त्रिकर्मापाजनाध्यायनप्रतिग्रहवान्।नागरे।आमंत्रयेद्यतीन्पूर्वं स्नातकान्वा
त्रिकर्मिणः।तदभावे गृहस्थांश्च ब्रह्मज्ञानपरायणान्।किंच।यतीन्स्वयामेव सतस्त्वनाहूतवतो हव्यं भजेद्द्रान्सान्।नारदस्मृतौ।यो वै यती
ननाहूत्य भोजयेदितरान्द्विजान्।नार विजानन्वसतो ग्रामे हव्यमाप्नोति राक्षसान्।किंच।स्वयामेव सतः प्रमादपरिहाणात्स्वाद्ध कालेसमेतां
स्त्विन्नतपि भोजयेत्।प्रमादेनपरिहीणास्त्यक्ताः।ब्राह्मे।भिक्षार्थमागतांश्चापि काले संयमिनो यतीन्।भोजयेत्प्रणिपाताद्यैः प्रसाद्य प
तमातमः।किंच।प्रथमतो विप्रोपवेशादितान्।पित्र्ये स्थानइतः परं त्वितयतीन्पूर्वो पविष्टये द्विजानां पार्श्वेपि च भोजयेत्।वार्हस्पत्यसं

हिता। श्राद्धकाले यतिं प्राप्तं पितृस्थाने तु भोजयेत्। परिविषयेन्नत्वथ मंयदिवा पार्श्वतः स्थितं। किंच। प्रथमतः श्राद्धाद्वयातं यतिं। संस्थाप्य प्रार्थनयो
द्धरेद्धिम पितृन्विप्रांश्च दातृंस्तु तावद्दारान्योयतिधर्मं उक्तं इमस्यहे इत्यत्र वारिणापि। छागलेयः। भोजयेच्छ्राद्धकाले पियतिं सब्रह्मचारिणं। विप्रांस्तु इतरे
पापात्पितृमातृगणानपि। तारयंति च दातारं तु ज्ञात्वा दारान्पितृंस्तथा। किंच। अन्त्याद्याश्रमयोरलाभ उदितो वैखानसस्नस्य चालाभे नैष्ठिकसंयतेंद्रिय
उदासीनस्तु भोज्यो मतः। आद्यो ब्रह्मचारी। उदासीनो दारतु रसंबंधी। शातातपः। अलाभे यतिभिक्षूणां वनस्थमपि पूजयेत्। तदलाभे तु दासीनं नै
ष्ठिकं संयतेंद्रियं। मतिषु पि मुंडादि निषेधमाह काषायाञ्जटिलांस्त्यजेदिहियतीन्मुंडाञ्शिखिभ्यश्चित्रदंडिभ्यो गैरिकरक्तवस्त्रपरिधानेभ्यः प्रदद्या
दिह। इह श्राद्धे। आश्रमस्था दिक षायरक्तवस्त्राः काषायाः। ब्रह्मवैवर्ते। मुंडाञ्जटिलकाषायान्श्राद्धकाले विवर्जयेत्। शिखिभ्यो प्यशक्तिधातुर
क्तेभ्यश्चित्रदंडिभ्यः प्रदापयेत्। व्रतियस्योर्नित्यं भिन्नाशिवविधेः श्राद्धभुजे विषयमाह अन्यानुग्रहतो प्यशक्तितः तत्रानेकान्नलाभस्य चाभावेन्नं यति
रेकदन्नमुपभुंजीत व्रतं पालयन्। अन्नायान्मधुमांसवर्जितमनापद्यप्यथाद्याश्रमः श्राद्धेभ्यर्थितइच्छया द्विजवरस्त्वेवं न दोषस्त्रयोः। लयन्। अन्ना
यान्मकार्ष्णीजिनिः। अशक्तोतु ग्रहार्थवायतिस्कान्नभुग्भवेत्। याज्ञवल्क्यः। ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि। ब्राह्मणः काममश्नीयाच्छ्राद्धे

श्राद्ध·टी·
५१

51

व्रतमपाउयन्‌। मधुमांसविधिर्यतिहीने श्राद्धे यतिविधिश्च मधुमांसहीने इत्याह। य श्राद्धे चापि निमंत्रणं यतिवरस्य द्विजो द्रमांसोऽश्निते यत्पापमंत्र एणवर्जिते
वमधुमांसस्योपरूक्तिर्निर्मता। अथातिथिस्वरूपमाहस्पाथोकुलमामनीनविदितेतत्कालयातं तु अमुत्तुं श्रांतं गतमकिंचनं त्वतिथिवामाऊर्व्रीहिणं या
वकं। नाहूतं न च विंतितं प्रियमुतद्वेष्यं तथा पंडितं मूर्खं वामि च वैश्वदेव समयांते चैकरात्रं स्थितं। तपःकायः सकलोत्सवस्पतिथि पर्वादेर्व्रतो वीयति
मार्कंडेये। अज्ञातकुलनामानं तत्कालसमुपस्थितं। बुभुक्षुमागतं श्रांतं याचमानमकिंचनं। ब्राह्मणं प्राहुरतिथिं स्त्यं स्वशक्तितो बुधैः। भविष्यपुरा
णे। अचिंत्यमानो नाहूतो वैश्वदेवमुपागतः। अतिथिं तं विजानीयान्न भूनः पूर्वमागतं। शातातपः। प्रियो वा यदि वा द्वेष्यो मूर्खः पंडित एव वा। प्राप्तः क्वा वै
श्वदेवांते सोऽतिथिः स्वर्गसंक्रमः। यमः। तिथिपर्वोत्सवाः सर्वे त्यक्ता येन महात्मना। सोऽतिथिः सर्वभूतानां शेषानभ्यागतान्विदुः। उत्तीय तिर्वैकरात्रं
निवसन्नुच्यते तिथिः। अभ्यागता नाह राजन्यादिकवर्णमित्रगुरवो ज्ञातिर्गृहीवावना एते भ्यागतसंज्ञकाय द्रपि तादत्ताव मेधस्वतंत्रैकाहाधिकं। ता
दृत्त्वा अतिथिलक्षणक्रांताः। मनुः। ब्राह्मणस्यत्वनतिथिर्गृहे राजन्य उच्यते। वैश्यशूद्रौ सखा चैव ज्ञातयो गुरुरेव च। अतिथिभेदा वाह एषवद्धिवि राम:
धएतः सायमध्यान्हयोः। सूर्योढास्त्व इहादिमो तच निराकार्यो न नाशेपि वा भूपाथस्तरणतोर्वयेक्तुतपसंज्ञश्चेतरः। प्रचेताः। यः सायं वैश्वदेवांते वासा ५१

यगृहमागतः। दैववत्स पूजनीयोसौ सूर्योढः सोतिथिः स्मृतः सायंतनोत्र वैश्वदेवः। याज्ञवल्क्यः। अप्रणोद्योतिथिः सायमपि वाग्भूतृणोदकैः। पै
ठीनसिः। ज्ञातोपि श्राद्धवेलायां श्रोत्रियो वदिद्दृश्यते श्राद्धं भुनक्ति वै यस्मात्कुतपस्तेन संज्ञितः कश्चिन्नातिथिरित्याह नातिथिः। एकग्रामगतः श्रो
दितगुरौर्ज्ञातोपि। आदित्यपुराणे नैकग्रामीणमतिथिं कथयंति मनीषिणः। किंच। बह्वागमेवाशक्तो च विशिष्टमेकमविशेषेत्वाद्यमेवार्चये
त्। प्रारवः। यदि बहूनां मीनशः कुर्यादेकस्मै शालवनेरर्धात्वथमभ्युपागतः स्याच्छ्रोत्रियस्तस्मादिति॥ इति तिथिलक्षणं॥ अथ तत्प्रशंसा॥ लोका
नुग्रहपित्र्यरक्षणं कृते देवास्तथा योगिनोटंतो हातिथिरूपतः सच गृहस्यानां परैरैवतं। शिवधर्मोत्तरे। अनुग्रहाय लोकानां श्राद्धसंप्रेक्षणाय च। चरंत
तिथिरूपेण देवा योगाश्च भूतले। योगायोगिनः। तस्माद्गृहाश्रमस्थस्य नान्यद्दैवतमुच्यते। स तेतिथिर्महाभागे सत्यमेतद्विचारय। किंच। धातृश्चक्र
यमोप्रजापतिरथो वह्निर्वसूनां गणाश्चैते श्रेत्यतिथिं प्रविश्य विष्णुपुराणे धाता प्रजापतिः शक्रो वह्निर्वसुगणोयमः। प्रविश्यातिथिमेते वै भुंजतेन्नं
नरेश्वर। किंच। गृहिणां बंधुः परश्चातिथिः। गेहानेत्यकृपाकुलः कुलममीषां तारयत्येष यत्नेच्छातः कुतुकाचरंति पृथिवीं सिद्धा गृहस्थांगणे। प्र
भासखंडे। नातिथेः परमो बंधुर्विद्यते गृहमेधिनां। गृहागतेप्यकृपया संतारयति यः कुलं। सिद्धाश्चरंति पृथिवीं कौतुकेन यदृच्छया। अतिथीनां

हिरूपेणगृहागमनमुपागताः। किंच। गेहान्यादरजःपुनाति वरणप्रक्षालनं भोः खिलं पापं क्षालयति हयत्प्रणति सत्कारो वयज्ञाधिको। देवाना
मपि दुर्लभाः कुलममी संतारयंते खिलं दत्तान्नोदकं तःप्राप्त तिर्यंछां यज्ञादपि विशिष्यं परं त्वतिथितश्चेभ्यो न लोकत्रये। नारदीयपुराणे। पुनंति
गृहिणां गेहान्यदीयाः पादपांसवः। क्षालयत्यखिलं पापं यत्पादक्षालनोदकं। सत्कृतिः प्रणतिर्येषां यज्ञादपि विशिष्यते। येषामन्नोदकं दत्तं तार
यत्यखिलं कुलं। अतिथिभ्यः परं तेभ्यः परं किमस्ति भुवनत्रये देवानामपि वंद्याः स्मृता इति। किंच रक्षंति त्वसुरांस्तिलानतः कुशा रक्षंत्यथ श्रोत्रियोऽपं
क्त्यानं रक्षति सर्वरक्षक इह श्राद्धे तिथिस्तूरितः। काशीजिनिः। तिला रक्षंति त्वसुरान् दर्भा रक्षंति राक्षसान्। अपंक्त्यान् श्रोत्रियो रक्षेदतिथिः सर्वरक्षकः।
॥ इत्यतिथिप्रशंसा॥ अथ तत्परीक्षा निषेधमाह नारदः। चरणं च गोत्रकुलवेदान्नशीलविद्याचरित्रंदेशादि परीक्षयेन्न गुणावंतं निर्गुणं वा द्विजं। स्वा
कारेवितरं कुचेलमथवा स्वाच्छादनं नावमन्येत्तेनं विचिकित्सया पितृहरिब्रह्मात्मकं चिंतयेत्। नारसिंहे। न परीक्षेन्नचरितं न विद्यां न कुलं तथा। न
शीलं न च देशादीनतिथेरागतस्य वै। कुरूपं वा सुरूपं वा कुचैलं वा सुवाससं। विद्यावंतमविद्यं वा सगुणं वाथ निर्गुणं। मन्येत विष्णुमेवैतं साक्षा
न्नारायणं हरिं। अतिथिं समनुप्राप्तं विचिकित्सेन्न कर्हिचित्। मार्कंडेये। एतच्छिद्रोत्रवरणं स्वाध्यायं वापि पंडितः। शोभनाशोभनाकारं मन्यते

तेप्रज्ञापतिं।किंचदेवाद्योगिवराश्चरंतिष्ठथिवीमीत्येतयाशंकया।विष्णुधर्मोत्तरे।योगीन्द्रशंकयानित्यमतिथिंनविचारयेत्।अथातिथिपूजामाह।
अथास्यस्वागतमासनंप्रियवचश्चक्षुर्मनःश्रद्धयाअर्घ्यपाद्यमथान्नमाचमनकंस्थानंचरेच्छ्रोत्रियेमात्यवश्रणतिंतथादरमुपास्तिंदीपशय्याश्रयान्।आ
त्मानंचसमर्पयेद्बचरणाभ्यंगंवपूजांचरेदायातंविहितांजलिरभिमुखंयायाद्यथाद्यनुव्रजेत्।यांतंव।हारीतः।तस्यस्वागतमर्घ्यपाद्यमाचमनं
